© 2018 IJSRSET | Volume 4 | Issue 1 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099

# परीक्षिन्नाटकचक्रे अभिव्यक्तिसापेक्ष्या नवीनप्रयोगा :



**सुधा मिश्रा, शोधच्छात्रा**
राष्ट्रिय संस्कृत संस्थान (मा.वि.वि.)
गङ्गानाथ झा परिसर, इलाहाबाद

परीक्षिन्नाटकचक्रे सप्तविंशतिः नाटकानि सङ्गृहीतानि तेषु चतुर्दश पौराणिकानि, षट् ऐतिहासिकानि, सप्त सामाजिकानि। गतं संस्कृतयुगमिति केषाञ्चन भ्रमं निरसयितुं जीवति अद्यापि संस्कृतं, जीवितव्यं च तेन इति प्रदर्शयितुमिव लेखकेन वर्तमानकालानि सामाजिकाशयानि सप्त नाटकानि विरचितानि। तन्मध्ये कानिचित् चिरन्तनप्रेमविषयं विमृशन्ति, अन्यतमं संस्कृतस्य स्थानमिति घोषयन्ति, इतराणि सद्यःकालीनान् सामाजिकान् दोषान् स्त्रीस्वातन्त्र्यसदृशान् विषयान् निर्दिशन्ति।

परीक्षितमहोदयस्य नाटकनामध्ययनेन ज्ञायते यत् तेन स्वमातृभाषायाः शब्दान् अधिकृत्य नाट्यसंरचनामकारि। तस्य नाटकस्य विविधपात्राणां संवादस्याध्ययनेन पश्यामो यत् तस्मिन् संवादे सामान्यव्यवहारस्य प्रचलिताः शब्दाः सर्वत्र प्रयुक्ताः सन्ति। निदर्शनार्थं सावित्रीति पौराणिकनाटकस्य सावित्रीयमसंवादस्य शब्दान् अवलोकयन्तु –

सावित्रीकृदेवेश! तिष्ठ। अत्र भवता प्रोक्तम् – 'अयं सत्यवान् धर्मवान् रूपवान्' इति किमर्थम् अस्य प्राणान् नयसि। (इति विलपति)

यमः – सावित्रि! किमर्थं विलपसि। जगति मरणम् अवश्यमेव जन्तोः। किमिति मुधा कुरुषे विलम्बम् ? कुरुष्वापरकर्म।

सावित्री – देवेश! विंह्र प्रयोजनं सत्त्वधर्मरूपादिगुणैः।

यमः – (विहस्य) एते गुणाः केवलं महापुरुषगुणाः। महापुरुषा अपि पञ्चत्वं प्राप्नुवन्ति। सावित्रि! विंह्र वृथालापैः प्रयोजनम्। निवर्तस्व, और्ध्वदेहिवंह्र कुरुष्व।

सावित्री – प्रभो! कुत्र गच्छेयम्, अहम् एकाकिनी। कथं गच्छेयं विसृत्य पतिम् एनम्।

नीयते यत्र मे भर्ता स्वयं यत्रैव गच्छति।
गन्तव्यं च मया तत्र धर्मोऽयं च सनातनः[1]।।

एतादृशसाधारणव्यावहारिकशब्दान् प्रयुज्य कविः साधारणसहृदयानां कृते सहजमकरोत् अवबोधनम्। सावित्रीत्यस्याः नाटकस्य माध्यमेन भारतीयनारीणां यथार्थं चित्रणं प्राप्यते।

यद्यपि पौराणिकनाटकानां कथा तु पारम्परिकी एव, परं एतेषां संवादशैली आधुनिकरीत्यनुसारेण प्रतिभाति। ऐतिहासिकानि नाटकानि समसामयिक–सामाजिकसमस्यापरकानि सन्ति। तत्र रक्षाबन्धनं नाटवंह्र चारित्र्यात्मकम्। रजनी–पुरुषोत्तमसंवादेन चरित्रस्य उदात्तता प्रकटिता भवति।

रजनी – महाराज! अलक्ष्येन्द्रः मे भवितव्यः पतिः। तं संग्रामे भवान् रक्षतु। इमां भगिनीं सौभाग्यवतीं करोतु इति मे अभ्यर्थना।

पुरुषोत्तमः – भगिनि! एतादृशी ते कामना इति नाहं जाने। अहं मम देशसुखाय। स्नेहं दयां सौख्यं च लोकस्य आराधनाय संत्यक्ष्यामि। अधुना त्वदीया कामना देशस्य अहिता भविष्यति। सर्वः देशः अन्याक्रान्तः भविष्यति, अहं कथं रक्षयिष्यामि।

IJSRSET1849120 | Received : 02 January 2018 | Accepted : 15 January 2018 | January-February-2018 [(4) 1 : 1631-1634]

रजनी – भवन्तः राजानः किमपि कर्तुं सक्षमाः, इयन्तं याचे, मे सौभाग्यं रक्षन्तु इति।

पुरुषोत्तमः – भगिनि! मे मनः द्विधा विभक्तम्। देशरक्षणम्, अन्यतः भगिनीसंरक्षणम्। देशरक्षणं बलवत्तरं भाति भगिनीरक्षणापेक्षया।

रजनी – अद्य रक्षाबन्धनमुहूर्त्तः। यदि एतस्य रक्षाबन्धनस्य मूल्यं नास्ति, तर्हि त्वां देशीयाः परम्परानाशवंह मन्वते। देशे रक्षाबन्धनमहोत्सवः स्थगितः भविष्यति।

पुरुषोत्तमः – भगिनि, त्वं मा विचारय, अस्मिन् समये अहं देशम् अपि भगिनीं त्वां रक्षिष्यामि। मा शुचः गच्छ त्वम्।

रजनी – महाराज! भवन्तः पुरुषोत्तमाः, भवतां कीर्तिः आचन्द्रतारार्वंह वर्तिष्यति, सर्वे प्रपञ्चे। अहं धन्याऽस्मि। (इति नमस्कृत्य गच्छति)।

पुरुषोत्तमः – अहो विपदि विपत् सुखे सुखम् अनुसरतः इति लोकोक्तिः सत्यमेव अत्र मया दृष्टम्। धर्मो रक्षति रक्षितः[1]।

अनेन संवादेन पुरुषोत्तमस्य महच्चरित्रं प्रकटितं भवति।

कथावस्तु अनुसारं विविधपात्राणि आङ्गिक–वाचिक–सात्त्विक–आहार्यादिभिः अभिनीय नाट्ये संगठितानां नाटकानामनुसारेणैव स्वकीयान् मनोभावान् अभिव्यञ्जयन्ति। नाटककारः पात्राणां मनोभावं प्रकटयितुं सङ्गीतस्य प्रयोगं करोति। सङ्गीतमाध्यमेन पात्राणां मनोभावं प्रकटितं भवति। कचदेवयानीयनाटकविषये सूत्रधारस्य वक्तव्यं भावाभिव्यञ्जनस्य मार्गनिर्देशकः प्रतिभाति।

सङ्गीतरम्या कचदेवयानी विभाति श्रृङ्गाररसप्रपूर्णा।
नटीनटानां सुलभाभिनेया पद्याश्रियाऽभूषितसन्निवेशैः[1]।।

देवयानी स्वहृदयस्य प्रेमानुरागस्य प्रकटनाय गीतं गायति। तद्यथा –

चिन्तय नूनं मम कविता गानम्।
नितरां पिब मधुराधरपानम्।।
यौवनमदभरितं हृदयम् । चिन्तय रसिकमनाः सदयम् ।
मन्मथहेलालसितं मधुरम् । पिब सरसवचो मधुरम् ।।
चिन्तय मे पद–निचयम् । निवसतु सुतरामभयम् ।।
सर्वकलाकलितं हृदयम् । जातं रसमयनिलयम् ।।
मुञ्चति मदनः कुसुमशरम् । पश्यत्याशाचतुरस्वरम् ।।
समाहार कुसुमचयं प्रेमभरम् । शामय मदनं हृदयहरम्[1]।।

एतेन कोऽपि सहृदयः अनुमातुं शक्यते यत् तस्याः हृदये कमपि जनं प्रति अनुरागोऽस्ति। एवमेव कचस्य गानं श्रुत्वा स्वाभिप्रायं व्यनक्ति देवयानी।

सुधालिप्तेन रागेण कृताऽहं भावरागिणी ।
विना सङ्गीतसाहित्यं जीवनं भाति पाशवम्[2]।।

प्रेम–लज्जा–भयादिभावानाम् अभिव्यञ्जनाय नर्तनशालानाटके रुचिकरः प्रयोगः दर्शनीयः पण्डितशर्मणः। सप्तमे दृश्ये कीचकसैरन्ध्रीसंवादे एतेषां भावानां प्रकटनं भवति। अष्टमे दृश्ये कीचकः कीदृशः सैरन्ध्री–सङ्गताय विकलोऽस्ति। तस्य भावं प्रकटयति कविः–

अतीव सुखदा इयं रजनी मे विषायते। विलासिनि! किमर्थं चिरयसि त्वम्। अहो अतीव वेला यापिता निरर्थवंह्न प्रिये!

आलिङ्ग्य देहं कुचभारनम्रं
विलासलावण्यसरोवरे ते ।
तान् यथेच्छं रसमग्नचित्तं
प्रशामयेयं मम स्मरबाधाम्[1]।।

कर्णस्य कठोरभावनाभिव्यञ्जानाय तस्य वाक्यं स्मरणीयमस्ति। कर्ण–कुन्तीसंवादः दर्शनीयः –

कुन्तीकृत्वं मे बाधां न जानासि। मातृदेवो भव इति वेदाः घोषयन्ति। वयं वेदमतानुयायिनः। त्वं मातृदेवो भव।

कन्यादशायां शतथा प्रसूतिः
लोकापवादस्य निदानभूता ।
इत्येवमालोक्य ससर्ज बालं
हेतुर्न चास्तीह सुतो द्वितीयः।।

कर्णः – अहं न तृणीकरोमि ते कथनम्। लोके विद्यमानस्थितिं कथयामि। माता यदि शिशोः मलमूत्रादिकम् उदधृत्य स्वच्छतां करोति, तेन शिशुना सार्धं खेलति, तस्य सुखदुःखादिकम् आत्मीयं पश्यति, सा माता भवितुमर्हति, तदा सा माता मातृह्रदयपूर्णा भवति। मयि तत् कर्म त्वया न कृतम्। ततः मयि न विद्यते पुत्रप्रेम। अहं कदापि त्वां मातः, जननि, अम्बे इति नाहूतवानास्मि। अनेन कारणेन त्वयि मम मातृभावना नास्ति। त्वं जानासि मां प्रसूतवती इति। तस्मात् तत् प्रसूतिकारणं निमित्तीकृत्य मां बोधयितुं समागताऽसि। मम शैशवं त्वमदृष्टवती। तव मातृह्रदयम् अहं अदृष्टवानस्मि। तस्मात् आवयोर्मध्ये मातासुतभावः शून्यरूपेणास्ति[1]।

अत्र मातासुतयोः विवशतायाः भावाभिव्यञ्जनं द्रष्टव्यमस्ति।

प्रतिशोधभावनां व्यञ्जयितुं 'वङ्कां वङ्कोण भिद्यते' इति नाटके द्रोणस्य कथनमवलोकनीयम् अस्ति।

द्रोणः – आशीविषविषप्रपूर्णमानसाः राजानः मधुरगीर्भिः जल्पन्तः तेषां प्रभुत्वं व्यापयन्ति। योग्यमयोग्यं न चिन्तयन्ति। तेषां चण्डशासनं निवारयितुं गरुडमन्त्रवत् ब्राह्मणबुद्धिविशेष एव योग्यः भवति। अधुना मे बुद्धिविशेषेण वङ्कारूपिणं द्रुपदराजानं वङ्कारूपिणा अर्जुनेन भेत्तुं प्रयतामि। (विहस्य) श्रीमतां राज्ञां निर्धनानां ब्राह्मणानां मैत्री कथं भविष्यति वा दर्शयेयम्। अरे द्रुपद! ब्राह्मणमेधा अप्रतिहता। चण्डरविप्रताप इव प्रचण्डः ब्राह्मणः सर्वं साधयिष्यति। न विस्मर्तव्यं भवता। पश्य मे शक्तिंह्न द्रुपद! पश्य[2]। अत्र द्रोणस्य प्रतिशोधभावना व्यक्तीभवति। सः तिरस्कारभावनां विस्मर्तुं न शक्नोति। तस्मात् सः कथयति –

पुष्पेण भिद्यते नैव वङ्कां जगति पार्थिव ।
ततो वङ्काात्मना भाव्यं वङ्कां वङ्कोण भिद्यते[1]।।

तपस्विनः पश्चात्तापभावनां द्रष्टुं शक्यतेऽस्मिन् शृङ्गीवाक्ये –

शृङ्गी – (आश्चर्येण) जनक! किमयं राजा परीक्षित् (विलपन्) बहु अपराद्धं मया। अनालोच्य शापं दत्तम्। धिगेतत् मे जनाः। महापुरुषं धर्मपालं राजानं परीक्षितम् शप्तवानस्मि। न मे प्रायश्चित्तो विद्यते। तपोधनाः सुलभक्रोधिनः भवन्ति क्रोधः तापसानाम् आभूषणं भवति। मे वाव्हपरशुः आकुण्ठितो भवति। न केषाम् अपि शक्यं मोघीकेर्तुं भवति। मे जिह्वा सप्तजिह्वप्राया। न कोऽपि शमयितुं शक्तः भवति (इति विलपति)[2]।

एतादृशीं प्रायश्चित्तभावनां विलोक्य मुनिः शमीकः उचितं कथयतिकृयद् बाल, विप्राः पश्चिमबुद्धयः।

नाटकचक्रस्य विविधपात्राणां संवादेषु श्लोकाः प्रयुक्ताः सन्ति, परं गीतमाध्यमेन सम्पूर्णः संवादः सज्जीभूतोऽभवत्। एतेन समीचीनं प्रतिभाति यद् भावः भावाभिनयः रसश्चेत्यादीनां समन्वयः एव नाट्यम्। तत् सफलीभूतं परीक्षिन्नाटकचक्रेह्न। अतः परीक्षितमहोदयस्य नाटकचक्रस्य रचना संस्कृतक्षेत्रे अत्यन्तं महत्त्वपूर्णं स्थानं भजते।

**सन्दर्भ :**


1. सावित्री, पृ. ८
2. रक्षाबन्धनम्, पृ. २२–२३
3. कचदेवयानीयम्, पृ. १
4. कचदेवयानीयम्, पृ. ७
5. कचदेवयानीयम्, पृ. ६
6. नर्तनशाला, पृ. १८
7. प्रबोधनम्, पृ. १५
8. वङ्कां वङ्कोण भिद्यते, पृ. १४
9. वङ्कां वङ्कोण भिद्यते, पृ. १४
10. पारीक्षितम्, पृ. ६